Digitized by Arya Samaj Foundation Chennai and eGangotri

0 5.1

।। ओं श्रीगणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

।। अच्छिद्रम् ।।

(तृतीयाष्टके सप्तमः प्रश्नः)

वेदालय

For copies of this book please contact-

S.Parameswaran
14/52 Manjula, Pestom Sagar
Chembur, Mumbai - 400 089
Tel: 524 2155.

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

3/Scanned

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ओं श्रीगणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

।। अच्छिद्रम् ।।

(तृतीयाष्टके सप्तमः प्रश्नः)

For copies of this book please contact-
S.Parameswaran
14/52 Manjula, Pestom Sagar
Chembur, Mumbai - 400 089
Tel: 524 2155.

For Private Circulation Only

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

।। श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम् ।।

मुद्रा

श्रीमत्परमहंसपरिव्राचकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण यमनियमासनप्राणायाम प्रत्याहार धारणाध्यानसमाध्यष्टाङ्गयोगानिष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्ग प्रवर्तक सर्वतन्त्र-स्वतन्त्रादिराजधानी विद्यानगर महाराजधानी कर्णाटकसिंहासन प्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थस्वामि गुरुकरकमलसञ्जात

।। श्रीजगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थस्वामिभिः ।।

अस्मदत्यन्तप्रियशिष्य श्रीपरमेश्वरशर्म विषये नारायणस्मरणपुरस्सर विरचिता आशिषस्समुल्लसन्तु।

भवन्तः वेदमधीत्य शिष्यानध्यापयन्तः अधुना लोकानामुपकाराय अत्यावश्यक वेदभागान् स्थूलाक्षरैः सस्वरं प्रकाशयन्तीति विदित्वा भृशं मोदामहे। अत्र हि रुद्रक्रमः महान्यासः उदकशान्तिरित्यादयः प्रकाशिता ये सर्वेषामत्यन्तमावश्यकाः। भवदीयोऽयमुद्यमः धर्मश्रद्धालूनामास्तिकानां प्रशंसापात्रमिति तु निश्चप्रचम्।

श्री शारदाचन्द्रमौळीश्वरयोरसीमया कृपया इमे ग्रन्थाः आस्तिकजन पाणिपल्लवान्यलंकुर्वन्तु भवन्तश्च श्रेयःपरम्पराभिस्समेधन्तामित्याशास्महे।।

इति नारायणस्मरणम्

शृङ्गगिरिः
प्रमाथिश्रावणकृष्णाष्टमी भार्गववासरः
३-९-१९९९

मुद्रा

CC-0 In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

SRI GURUBHYO NAMAHA

Digitized by Arya Samaj Foundation Chennai and eGangotri



MUTUAL TRUST — FRIENDSHIP — TOLERANCE—OUR TRADITION

Sri Sankara Jayanthi Celebration Committee

6, Savitha, 70,Pestomsagar, 2nd Road, Tilaknagar P.O., BOMBAY - 89.
Tel. Nos. : 5241864

Date

FOREWORD

Shri Parameswara Sharma has been conducting Veda Classes in Pestom Sagar Chembur, for over two decades, and has trained over a hundred vidyarthis comprising of a wide range of asthikas covering school children, college boys, office-goers and retired elders. He has been associated with our Shri Sankara Jayanthi Celebration Committee for the past 16 years conducting Rudra-japa-abhisheka-puja along with his disciples.

Shri Parameswara Sharma's teaching skill and the recitation of vedic hymns by his disciples have been appreciated by many eminent vedic scholars and patrons of Religious & Cultural Organisations.

A momentous occasion was in June 1994, when, pleased with the excellent Ghana recitation by a few of Parameswara Sharma's young disciples,and in appreciation of his glorious spiritual service,HisHoliness Shri Bharathi Theertha Swamigal, Sringeri Mutt blessed and honoured him with a '*Ponnadai*'.

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Besides conducting veda classes, Shri Parameswara Sharma devotes his available time in compiling Vedic Literature into convenient books, in bold print, very useful to vidyarthis and religious practioners. He has compiled the following books :-

RUDRAM -CHAMAKAM
RUDRA KRAMAM
CHAMAKA KRAMAM
MAHANYASAM
UDAKA SHANTHI
ACHIDRAM
ASWAMEDHAM (1)

Copies of books compiled by Parameswara Sharma were presented to HIS HOLINESS SHRI BHARATHI THEERTHA SWAMIGAL, for His approval & blessings. His Holiness has gone through the books and has expressed His happiness and said that the books are very good and would be useful to the students

Appreciating his effort & dedication, His Holiness has blessed Shri Parameswara Sharma with a *SHREEMUKHAM.*

I, on behalf of the Sri Sankara Jayanthi Celebration Committee, pray to Almighty to bestow upon Shri Parameswara Sharma, a healthy, blissful and long life to continue his noble social service of propagating Vedas and Vedic Culture among the youth and active citizens.

V. V. Chalam

V. Venkitachalam
Secretary
Sri Sankara Jayanthi Celebration Committee

13th September 1999.

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

विषयानुक्रमणिका

अनु		पञ्चा	पुटम्
०१	सर्वान्	01-09	01-07
०२	यद्विष्षाण्णेन	10-16	07-12
०३	नि वै	17-23	12-17
०४	याः पुरस्तात्	24-41	17-28
०५	देवा देवेषु	42-54	28-36
०६	परिस्तृणीत	55-78	37-51
०७	सक्षेदम्	79-92	52-61
०८	यदस्य पारे	93-95	61-63
०९	अनागसः	96-104	63-70
१०	उदस्तांफसीत्	105-110	70-74
११	ब्रह्म प्रतिष्ठा	111-115	74-78
१२	यद्देवा	116-121	78-82
१३	यत्ते ग्राव्ण्ण	122-125	82-85
१४	यद्दिदीक्षे	126-130	85-89

****

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

। ओं श्रीगणेश शारदा गुरुभ्यो नमः ।

।। श्री वेदव्यासाय नमः ।।

।। अच्छिद्रम् ।।

हरिः ओ(४)म्

(१) सर्वान् वा एषोऽग्नौ कामान्
प्रवेशयति। योऽग्नीनन्वाधाय व्रतमुपैति। स
यदनिष्ट्वा प्रयायात्। अकामप्रीता एनङ्-
कामानानुप्रयायुः। अतेजा अवीर्यस्स्यात्।
स जुहुयात्। तुभ्यन्ता अङ्गिरस्तम।
विश्वास्सुक्षितयः पृथक्। अग्ने कामाय
येमिर इति। कामानेवास्मिन्दधाति।[१]
कामप्रीता एनङ्कामा अनुप्रयान्ति।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेजस्वी वीर्यावान्भवति। सन्ततिर्वा एषा यज्ञस्य। योऽग्नीनन्वाधाय व्रतमुपैति। स यदुद्वायति। विच्छित्तिरेवास्य सा। तं प्राञ्चमुद्धृत्य। मनसोपतिष्ठेत। मनो वै प्रजापतिः। प्राजापत्यो यज्ञः। [२]।।

मनसैव यज्ञꣳ सन्तनोति। भूरित्याह। भूतो वै प्रजापतिः। भूतिमेवोपैति। विवा एष इन्द्रियेण वीर्येणर्ध्यते। यस्याहिताग्नेरग्निरपक्षायति। यावच्छम्यया प्रविध्येत्। यदि तावदपक्षायेत्। तꣳ संभरेत्। इदन्त एकं पर उत

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकम्। [३]।।

तृतीयेन ज्योतिषा संविशस्व। संवेशनस्तनुवै चारुरेधि। प्रिये देवानां परमे जनित्र इति। ब्रह्मणैवैनꣳ संभरति। सैव ततः प्रायश्चित्तिः। यदिपरस्तरामपक्षायेत्। अनुप्रयायावस्येत्। सो एव ततः प्रायश्चित्तिः। ओषधीर्वा एतस्य पशून्पयः प्रविशति। यस्य हविषे वथ्सा अपाकृता-धयन्ति। [४]।।

तान् यद्दुह्यात्। यातयाम्ना हविषा यजेत। यन्न दुह्यात्। यज्ञपरुरन्तरियात्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

वायव्या-य्यँवागून्निर्वपेत्। वायुर्वै पयसः प्रदापयिता। स एवास्मै पयः प्रदापयति। पयो वा ओषधयः। पयः पयः। पयसैवास्मै पयोऽवरुन्धे। [५] ।।

अथोत्तरस्मै हविषे वत्सानपा-कुर्यात्। सैव ततः प्रायश्चित्तिः। अन्यतरान् वा एष देवान्भागधेयेन व्यर्द्धयति। ये यजमानस्य सायं गृहमा-गच्छन्ति। यस्य सायन्दुग्धꣳ हविरार्ति-मार्च्छति। इन्द्राय व्रीही-न्निरुप्योपवसेत्। पयो वा ओषधयः। पय एवारभ्य गृहीत्वोप

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसति। यत्प्रातस्स्यात्। तच्छृतङ्कुर्यात्। [६]।।

अथेतर ऐन्द्रः पुरोडाशस्स्यात्। इन्द्रिये एवास्मै समीची दधाति। पयो वा ओषधयः। पयः पयः। पयसैवास्मै पयोऽवरुन्धे। अथोत्तरस्मै हविषे वथ्सानपाकुर्यात्। सैव ततः प्रायश्चित्तिः। उभयान्वा एष देवान्भागधेयेन व्यर्द्धयति। ये यजमानस्य सायञ्च प्रातश्च गृहमागच्छन्ति। यस्योभयꣳहविरार्तिमार्च्छति। [७]।।

ऐन्द्रं पञ्चशरावमोदनन्निर्वपेत्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

अग्निन्देवतानां प्रथमय्यँजेत्। अग्निमुखा एव देवताः प्रीणाति। अग्निव्वाँ अन्वन्या देवताः। इन्द्रमन्वन्याः। ता एवोभयीः प्रीणाति। पयो वा ओषधयः। पयः पयः। पयसैवास्मै पयोऽवरुन्धे। अथोत्तरस्मै हविषे वत्सानपाकुर्यात्। [८]।।

सैव ततः प्रायश्चित्तिः। अर्द्धो वा एतस्य यज्ञस्य मीयते। यस्य व्रत्येऽहन्पत्न्य-नालम्भुका भवति। तामपरुद्ध्य यजेत। सर्वेणैव यज्ञेन यजते। तामिष्ट्वोपह्वयेत। अमूहमस्मि। सात्त्वम्। द्यौरहम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथिवी त्वम्। सामाहम्। ऋक्त्वम्। तावेहि संभवाव। सह रेतो दधावहै। पुꣳसे पुत्राय वेत्तवै। रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेति। अर्द्ध एवैनामुपह्वयते। सैव ततः प्रायश्चित्तिः। [९] ।। *****

(२) यद्विष्वण्णेन जुहुयात्। अप्रजा अपशु र्यजमानस्स्यात्। यदनायतने निनयेत्। अनायतनस्स्यात्। प्राजापत्ययर्चा वल्मीकवपायामवनयेत्। प्राजापत्यो वै वल्मीकः। यज्ञः प्रजापतिः। प्रजापतावेव यज्ञं प्रतिष्ठापयति। भूरित्याह। भूतो वै

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रजापतिः। [१०]।।

भूतिमेवोपैति। तत्कृत्वा। अन्यान्दुग्ध्वा पुनर् होतव्यम्। सैव ततः प्रायश्चित्तिः। यत्कीटावपन्नेन जुहुयात्। अप्रजा अपशु र्यजमानस्स्यात्। यदनायतने निनयेत्। अनायतनस्स्यात्। मद्ध्यमेन पर्णेन द्यावापृथिव्ययर्चाऽन्तः परिधि निनयेत्। द्यावापृथिव्योरेवैनत्प्रतिष्ठापयति। [११]।।

तत्कृत्वा। अन्यान्दुग्ध्वा पुनर् होतव्यम्। सैव ततः प्रायश्चित्तिः। यदववृष्टेन जुहुयात्। अपरूपमस्यात्मञ्जायेत।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

किलासो वा स्यादर्शसो वा। यत्प्रत्येयात्। यज्ञव्विँच्छिन्द्यात्। स जुहुयात्। मित्रो जनान्कल्पयति प्रजानन्न्। [१२]।।

मित्रो दाधार पृथिवीमुत द्याम्। मित्रः कृष्टीरनिमिषाभिचष्टे। सत्याय हव्यङ्घृतवज्जुहोतेति। मित्रेणैवैनत्कल्पयति। तत्कृत्वा। अन्यान्दुग्ध्वा पुनर् होतव्यम्। सैव ततः प्रायश्चित्तिः। यत्पूर्वस्यामाहुत्याँ हुतायामुत्तराऽऽहुतिस्स्कन्देत्। द्विपाद्भिः पशुभि र्यजमानो व्यिद्ध्येत। यदुत्तरयाऽभि जुहुयात्। [१३]

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

चतुष्पाद्भिः पशुभि र्यजमानो व्यिर्द्ध्येत। यत्र वेत्थ वनस्पते देवानां गुह्या नामानि। तत्र हव्यानिगामयेति वानस्पत्ययर्चा समिधमाधाय। तूष्णीमेव पुनर्जुहुयात्। वनस्पतिनैव यज्ञस्यार्ता-ञ्चानार्ताञ्चाहुती विदाधार। तत्कृत्वा। अन्यान्दुग्ध्वा पुनर् होतव्यम्। सैव ततः प्रायश्चित्तिः। यत्पुरा प्रयाजेभ्यः प्राङङ्गार स्स्कन्देत्। अद्ध्वर्यवे च यजमानाय चाकँ स्यात्। [१४]।।

यद्दक्षिणा। ब्रह्मणे च यजमानाय

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

चाकँ स्यात्। यत्प्रत्यक्। होत्रे च पत्नियै च यजमानाय चाकँ स्यात्। यदुदङ्। अग्नीधे च पशुभ्यश्च यजमानाय चाकँ स्यात्। यदभिजुहुयात्। रुद्रोऽस्य पशून्घातुकस्स्यात्। यन्नाभिजुहुयात्। अशान्तः प्रह्रियेत। [१५]।।

स्रुवस्य बुद्ध्नेनाभि निदद्ध्यात्। मा तमो मा यज्ञस्तमन्मा यजमानस्तमत्। नमस्ते अस्त्वायते। नमो रुद्र परायते। नमो यत्र निषीदसि। अमुं मा हिँसीरमुं मा हिँसीरिति येन स्कन्देत्। तं प्रहरेत्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहस्रशृङ्गो वृषभो जातवेदाः। स्तोमपृष्ठो घृतवान्त्सुप्रतीकः। मा नो हासीन्मेत्थितो नेत्वा जहाम। गोपोषन्नो वीरपोषञ्च यच्छेति। ब्रह्मणैवैनं प्रहरति। सैव ततः प्रायश्चित्तिः। [१६]।। *****

(३) विवा एष इन्द्रियेण वीर्येणदृध्यते। यस्याहिताग्नेरग्नि र्मत्थ्यमानो न जायते। यत्रान्यं पश्येत्। तत आहृत्य होतव्यम्। अग्नावेवास्याग्निहोत्रꣳ हुतं भवति। यद्यन्यन्नविन्देत्। अजायाꣳ होतव्यम्। आग्नेयी वा एषा। यदजा।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

अग्नावेवास्याग्निहोत्रँ हुतं भवति। [१७]।

अजस्य तु नाश्नीयात्। यदजस्याश्नीयात्। यामेवाग्नावाहुतिञ्जुहुयात्। तामद्यात्। तस्मादजस्य नाश्यम्। यद्यजान्न विन्देत्। ब्राह्मणस्य दक्षिणे हस्ते होतव्यम्। एष वा अग्नि वैश्वानरः। यद्ब्राह्मणः। अग्नावेवास्याग्निहोत्रँ हुतं भवति। [१८]।

ब्राह्मणन्तु वसत्यैनापरुन्ध्यात्। यद्ब्राह्मणं वसत्या अपरुन्ध्यात्। यस्मिन्नेवाग्नावाहुतिञ्जुहुयात्। तं भागधेयेन व्यर्द्धयेत्। तस्माद्ब्राह्मणो वसत्यैनापरुद्ध्यः।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

यदि ब्राह्मणन्न विन्देत्। दर्भस्तम्बे होतव्यम्। अग्निवान् वै दर्भस्तम्बः। अग्नावेवास्याग्निहोत्रꣳ हुतं भवति। दर्भाꣳस्तु नाद्ध्यासीत। [१९]।।

यद्दर्भानद्ध्यासीत। यामेवाग्नावाहुतिञ्जुहुयात्। तामद्ध्यासीत। तस्माद्दर्भा नाद्ध्यासितव्याः। यदि दर्भान्न विन्देत्। अफ्सु होतव्यम्। आपो वै सर्वा देवताः। देवतास्वेवास्याग्निहोत्रꣳ हुतं भवति। आपस्तु न परिचक्षीत। यदापः परिचक्षीत। [२०]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

यामेवाफ्स्वाहुतिञ्जुहुयात्। तां परि चक्षीत। तस्मादापो न परिचक्ष्याः। मेद्ध्या च वा एतस्यामेद्ध्या च तनुवौ सꣳसृज्येते। यस्याहिताग्ने- रन्यैरग्निभि- रग्नय- स्सꣳ सृज्यन्ते। अग्नये विविचये पुरोडाशमष्टा- कपालन्निर्वपेत्। मेद्ध्याञ्चैवास्यामेद्ध्याञ्च तनुवौ व्यावर्तयति। अग्नये व्रतपतये पुरोडाश-मष्टाकपाल-न्निर्वपेत्। अग्निमेव व्रतपतिꣳ स्वेन भागधेयेनोप धावति। स एवैनं व्रतमालम्भयति। [२१]।।

गर्भꣳस्रवन्तमगदमकः। अग्निरिन्द्र-

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्वष्टा बृहस्पतिः। पृथिव्यामवचुश्चोतैतत्। नाभि प्राप्नोति निरृतिं पराचैः। रेतो वा एतद्वाजिनमाहिताग्नेः। यदग्निहोत्रम्। तद्यथ्स्रवेत्। रेतोऽस्य वाजिन ँ स्रवेत्। गर्भ ँ स्रवन्तमगदमकरित्याह। रेत एवास्मि न्वाजिनन्दधाति। [२२]।।

अग्निरित्याह। अग्निर्वै रेतोधाः। रेत एव तद्दधाति। इन्द्र इत्याह। इन्द्रिय-मेवास्मिन्दधाति। त्वष्टेत्याह। त्वष्टा वै पशूनां मिथुनाना ँ रूपकृत्। रूपमेव पशुषु दधाति। बृहस्पतिरित्याह। ब्रह्म वै देवानां

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

बृहस्पतिः। ब्रह्मणैवास्मै प्रजाः प्रजनयति। पृथिव्यामवचुश्चोतैतदित्याह। अस्यामेवैनत् प्रतिष्ठापयति। नाभि प्राप्नोति निर्ऋतिं पराचैरित्याह। रक्षसामपहत्यै। [२३]।।***

(४) याः पुरस्तात्प्रस्रवन्ति। उपरिष्टात्सर्वतश्च याः। ताभी रश्मि पवित्राभिः। श्रद्धायय्यँज्ञमारभे। देवा गातुविदः। गातुय्यँज्ञाय विन्दत। मनसस्पतिना देवेन। वाताद्यज्ञः प्रयुज्यताम्। तृतीयस्यै दिवः। गायत्रिया सोम आभृतः। [२४]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमपीथाय सन्नयितुम्। वकल-
मन्तरमाददे। आपोदेवी श्शुद्धास्थ। इमा
पात्राणि शुन्धत। उपातङ्क्याय देवानाम्।
पर्ण्णवल्कमुत शुन्धत। पयो गृहेषु पयो
अघ्नियासु। पयो वथ्सेषु पय इन्द्राय
हविषे-द्ध्रियस्व। गायत्री पर्ण्णवल्केन।
पयस्सोमङ्करोत्त्विमम्। [२५]।।

अग्निङ्गृह्णामि सुरथय्यों मयोभूः।
य उद्यन्तमारोहति सूर्यमह्ने। आदित्य-
ञ्ज्योतिषाञ्ज्योतिरुत्तमम्। श्वो यज्ञाय
रमतान्देवताभ्यः। वसून्रुद्रानादित्यान्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

इन्द्रेण सह देवताः। ताः पूर्वः परिगृह्णामि। स्व आयतने मनीषया। इमामूर्जं पञ्चदशी-र्य्यँ प्रविष्टाः। तान्देवान्परिगृह्णामि पूर्वः। [२६]।।

अग्निर् हव्यवाडिह तानावहतु। पौर्णमासँ हविरिदमेषां मयि। आमावास्यँ हविरिदमेषां मयि। अन्तराग्नी पशवः। देवसँ सदमागमन्न्। तान्पूर्वः परिगृह्णामि। स्व आयतने मनीषया। इह प्रजा विश्वरूपा रमन्ताम्। अग्निङ्गृहपतिमभि सव्वँसानाः। ताः पूर्वः परिगृह्णामि। [२७]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्व आयतने मनीषया। इह पशवो विश्वरूपा रमन्ताम्। अग्निङ्गृहपतिमभि सव्वँसानाः। तान्पूर्वः परिगृह्णामि। स्व आयतने मनीषया। अयं पितृणामग्निः। अवाड्ढव्या पितृभ्य आ। तं पूर्वः परि गृह्णामि। अविषन्नः पितुङ्करत्। अजस्र-न्त्वा॰ सभापालाः। [२८]।।

विजयभाग॰ समिन्धताम्। अग्ने दीदाय मे सभ्य। विजित्यै शरदश्शतम्। अन्नमावसथीयम्। अभिहराणि शरदश्शतम् आवसथे श्रियं मन्त्रम्। अहिर्बुद्ध्नियो

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नियच्छतु। इदमहमग्निज्ज्येष्ठेभ्यः। वसुभ्यो यज्ञं प्रब्रवीमि। इदमहमिन्द्रज्ज्येष्ठेभ्यः। [२९]।।

रुद्रेभ्यो यज्ञं प्रब्रवीमि। इदमहवँरुणज्ज्येष्ठेभ्यः। आदित्येभ्यो यज्ञं प्रब्रवीमि। पयस्वतीरोषधयः। पयस्वद्वीरुधां पयः। अपां पयसो यत्पयः। तेन मामिन्द्र स ँ सृज। अग्ने व्रतपते व्रतञ्चरिष्यामि। तच्छकेयन्तन्मे राद्ध्यताम्। वायो व्रतपत आदित्य व्रतपते। [३०]।।

व्रतानां व्रतपते व्रतञ्चरिष्यामि।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तच्छकेयन्तन्मे राद्ध्यताम्। इमां प्राची-
मुदीचीम्। इषमूर्जमभि सꣳ स्कृताम्।
बहुपर्णामशुष्काग्राम्। हरामि पशुपामहम्।
यत्कृष्णो रूपङ्कृत्वा। प्राविशस्त्व-
व्वँनस्पतीन्। ततस्त्वामेकविꣳ शतिधा।
सम्भरामि सुसम्भृता। [३१]।।

त्रीन्परिधीꣳस्तिस्रस्समिधः। यज्ञायु-
रनुसञ्चरान्। उपवेषं मेक्षणन्धृष्टिम्।
सम्भरामि सुसम्भृता। या जाता ओषधयः।
देवेभ्यस्त्रियुगं पुरा। तासां पर्व राद्ध्यासम्।
परिस्तरमाहरन्न्। अपां मेद्ध्यय्यँज्ञियम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

स देव॑ शिवमस्तु मे। [३२]।।

आच्छेत्ता वो मारिषम्। जीवानि शरदश्शतम्। अपरिमितानां परिमिताः। सन्नह्ये सुकृताय कम्। एनो मानिगाङ्कतमच्चुनाहम्। पुनरुत्थाय बहुला भवन्तु। सकृदाच्छिन्नं बर्हिरूर्णामृदु। स्योनं पितृभ्यस्त्वा भराम्यहम्। अस्मिन्त्सीदन्तु मे पितरस्सोम्याः। पितामहाः प्रपितामहाश्चानुगैस्सह। [३३]।।

त्रिवृत्पलाशे दर्भः। इयान्प्रादेशसम्मितः। यज्ञे पवित्रं पोतृतमम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पयो हव्यङ्करोतु मे। इमौ प्राणापानौ। यज्ञस्याङ्गानि सर्वशः। आप्याययन्तौ सञ्चरताम्। पवित्रे हव्य शोधने। पवित्रेस्थो वैष्णवी। वायुर्वां मनसा पुनातु। [३४]।।

अयं प्राणश्चापानश्च। यजमानमपि गच्छताम्। यज्ञेह्यभूतां पोतारौ। पवित्रे हव्य शोधने। त्वया वेदि-व्विँविदुः पृथिवीम्। त्वया यज्ञो जायते विश्वदानिः। अच्छिद्र-य्यँज्ञमन्वेषि विद्वान्। त्वया होता सन्तनोत्यर्द्धमासान्। त्रयस्त्रि ँ शोऽसि तन्तूनाम्। पवित्रेण सहागहि। [३५]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

शिवेय॑ँ रज्जुरभिधानी। अघ्नियामुपसेवताम्। अप्रस्र॑ँसाय यज्ञस्य। उखे उपदधाम्यहम्। पशुभिस्सन्नीतं बिभृताम्। इन्द्राय शृतन्दधि। उपवेषोऽसि यज्ञाय। त्वां परिवेषमधारयन्न्। इन्द्राय हविः कृण्वन्तः। शिवश्शगमो भवासिनः। [३६]।।

अमृन्मयन्देवपात्रम्। यज्ञस्यायुषि प्रयुज्यताम्। तिरः पवित्रमतिनीताः। आपो धारयमातिगुः। देवेन सवित्रोत्पूताः। वसोस्सूर्यस्य रश्मिभिः। गान्दोह पवित्रे रज्जुम्। सर्वा पात्राणि शुन्धत।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एता आचरन्ति मधुमद्दुहानाः। प्रजावती-
र्यशसो विश्वरूपाः। [३७]।।

बह्वी र्भवन्तीरुप जायमानाः। इह
व इन्द्रो रमयतु गावः। पूषास्थ। अयक्ष्मा
वः प्रजया सꣳ सृजामि। रायस्पोषेण
बहुला भवन्तीः। ऊर्जं पयः पिन्वमाना
घृतञ्च। जीवो जीवन्तीरुप व-स्सदेयम्।
द्यौश्चेम-य्यँज्ञं पृथिवी च सन्दुहाताम्। धाता
सोमेन सह वातेन वायुः। यजमानाय
द्रविणन्दधातु। [३८]।।

उथ्सन्दुहन्ति कलशञ्चतुर्बिलम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

इडान्देवीं मधुमतीᳫं सुवर्विदम्। तदिन्द्राग्नी जिन्वतᳫं सूनृतावत्। तद्यजमानममृतत्वे दधातु। कामधुक्षः प्रणो ब्रूहि। इन्द्राय हविरिन्द्रियम्। अमूय्यँस्यान्देवानाम्। मनुष्याणां पयो हितम्। बहुदुग्धीन्द्राय देवेभ्यः। हव्यमाप्यायतां पुनः। [३९]।।

वथ्सेभ्यो मनुष्येभ्यः। पुनर्दोहाय कल्पताम्। यज्ञस्य सन्ततिरसि। यज्ञस्य त्वा सन्ततिमनु सन्तनोमि। अदस्तमसि विष्णवे त्वा। यज्ञायापि दधाम्यहम्। अद्भिररित्तेन पात्रेण। याः पूताः परिशेरते। अयं पयस्सोमङ्-

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्वा। स्वायॅंयोनिमपिगच्छतु। [४०]।।

पर्ण्णवल्कः पवित्रम्। सौम्यस्सोमाद्धि निर्मितः। इमौ पर्णञ्च दर्भञ्च। देवानाँ हव्य शोधनौ। प्रातर्वेषाय गोपाय। विष्णो हव्यँहि रक्षसि। उभावग्नी उपस्तृणते। देवता उपवसन्तु मे। अहङ्ग्राम्यानुपवसामि। मह्यङ्गोपतये पशून्। [४१]।। *****

(५) देवा देवेषु पराक्रमद्ध्वम्। प्रथमा द्वितीयेषु। द्वितीयास्तृतीयेषु। त्रिरेकादशा इहमाऽवत। इदँशकेयय्यँदिदङ्-करोमि। आत्मा करोत्वात्मने। इदङ्करिष्ये

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेषजम्। इदं मे विश्वभेषजा। अश्विना प्रावतय्युँवम्। इदमह सेनाया अभीत्वर्यै। [४२]।।

मुखमपोहामि। सूर्यज्योति र्विभाहि। महत इन्द्रियाय। आप्यायताङ्घृतयोनिः। अग्निर् हव्याऽनुमन्यताम्। खमङ्क्ष्व-त्वचमङ्क्ष्व। सुरूपन्त्वा वसुविदम्। पशूना-न्तेजसा। अग्नये जुष्टमभिघारयामि। स्योनन्ते सदनङ्करोमि। [४३]।।

घृतस्य धारया सुशेवङ्कल्पयामि। तस्मिन्थ्सीदामृते प्रतितिष्ठ। व्रीहीणां मेध

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुमनस्यमानः। आर्द्रः प्रथस्नु भुवनस्य गोपाः। शृत उथ्स्नाति जनिता मतीनाम्। यस्त आत्मा पशुषु प्रविष्टः। देवानांविष्ठामनु यो वितस्थे। आत्मन्वान्थ्सोम घृतवान् हि भूत्वा। देवान्गच्छ सुवर्विन्द यजमानाय मह्यम्। इराभूतिः पृथिव्यै रसो मोत्क्रमीत्। [४४]।।

देवाः पितरः पितरो देवाः। योऽहमस्मि स सन् यजे। यस्यास्मि न तमन्तरेमि। स्वं म इष्टꣳ स्वन्दत्तम्। स्वं पूर्तꣳस्वꣳश्रान्तम्। स्वꣳहुतम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

तस्य मेऽग्निरुपद्रष्टा। वायुरुपश्रोता। आदित्योऽनुख्याता। द्यौः पिता। [४५]।।

पृथिवी माता। प्रजापति- र्बन्धुः। य एवास्मि स सन् यजे। मा भेर्मा संविक्था मा त्वा हिँ सिषम्। मा ते तेजोऽपक्रमीत्। भरतमुद्धरेमनुषिञ्च। अवदानानि ते प्रत्यव-दास्यामि। नमस्ते अस्तु मा मा हिँ सीः। यदवदानानि तेऽवद्यन्न्। विलोमाकार्ष-मात्मनः। [४६]।।

आज्येन प्रत्यनजम्येनत्। तत्तु आप्यायतां पुनः। अज्यायो यवमात्रात्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आव्याधात्कृत्यतामिदम्। मारूरुपाम यज्ञस्य। शुद्धꣳस्विष्टमिंदꣳहविः। मनुना दृष्टाङ्घृतपदीम्। मित्रावरुण समीरिताम्। दक्षिणार्द्धादसम्भिन्दन्न्। अवद्याम्येकतो मुखाम्।[४७]।

इडे भागञ्जुषस्वनः। जिन्वगाजिन्वार्वतः। तस्यास्ते भक्षिवाणस्याम। सर्वात्मानस्सर्वगणाः। ब्रद्ध्न पिन्वस्व। ददतो मे माक्षायि। कुर्वतो मे मोपदसत्। दिशाङ्क्लृप्तिरसि। दिशो मे कल्पन्ताम्। कल्पन्तां मे दिशः। [४८]।।

दैवीश्च मानुषीश्च। अहोरात्रे मे

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पेताम्। अर्द्धमासा मे कल्पन्ताम्। मासा मे कल्पन्ताम्। ऋतवो मे कल्पन्ताम्। सव्वँथ्सरो मे कल्पताम्। क्लृप्तिरसि कल्पतां मे। आशानान्त्वाऽऽशापालेभ्यः। चतुर्भ्यो अमृतेभ्यः। इदं भूतस्याद्ध्यक्षेभ्यः। [४९]।।

विधेम हविषा वयम्। भजतां भागी भागम्। माऽभागोभक्त। निरभागं भजामः। अपस्पिन्व। ओषधीर्जिन्व। द्विपात्पाहि। चतुष्पादव। दिवो वृष्टिमेरय। ब्राह्मणानामिदँ हविः। [५०]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

सोम्याना ँ सोमपीथिनाम्। निर्भक्तो ब्राह्मणः। नेहा ब्राह्मणस्यास्ति। समङ्क्तां बर्हिर् हविषा घृतेन। समादित्यै र्वसुभिस्सं मरुद्भिः। समिन्द्रेण विश्वेभि र्देवेभिरङ्क्ताम्। दिव्यन्नभो गच्छतु यथ्स्वाहा। इन्द्राणी-वाविधवा भूयासम्। अदितिरिव सुपुत्रा। अस्थूरित्वा गार्हपत्य। [५१]।।

उपनिषदे सुप्रजास्त्वाय। संपत्नी पत्या सुकृतेन गच्छताम्। यज्ञस्य युक्तौ धुर्यावभूताम्। सञ्जानानौ विजहतामरातीः। दिवि ज्योतिरजरमारभेताम्। दश ते तनुवो

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञ यज्ञियाः। ताः प्रीणातु यजमानो घृतेन। नारिष्ठयोः प्रशिषमीडमानः। देवानान्दैव्येऽपि यजमानोऽमृतोऽभूत्। यव्वाँन्देवा अकल्पयन्न्। [५२]।।

ऊर्जोभाग ँ शतक्रतू। एतद्वान्तेन प्रीणानि। तेन तृप्यतम ँहहौ। अहन्देवाना ँ सुकृतामस्मि लोके। ममेदमिष्टन्न मिथुर्भवाति। अहन्नारिष्ठावनुयजामि विद्वान्। यदाभ्यामिन्द्रो अदधाद्-भागधेयम्। अदारसृद्भवत देव सोम। अस्मिन् यज्ञे मरुतो मृडतानः। मा नो विददभिभामो अशस्तिः। [५३]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मा नो विदद्वृजनाद्द्वेष्यायाया। ऋषभव्वाँजिनं व्वँयम्। पूर्णमास य्यँजामहे। स नो दोहताᳪं सुवीर्यम्। रायस्पोषᳪं सहस्त्रिणम्। प्राणाय सुराधसे। पूर्णमासाय स्वाहा। अमावास्या सुभगा सुशेवा। धेनुरिव भूय आप्यायमाना। सा नो दोहताᳪं सुवीर्यम्। रायस्पोषᳪं सहस्त्रिणम्। अपानाय सुराधसे। अमावास्यायै स्वाहा। अभिस्तृणीहि परिधेहि वेदिम्। जामिं मा हिᳪं सीरमुया शयाना। होतृषदना हरितास्सुवर्णाः। निष्का इमे यजमानस्य ब्रद्ध्ने। [५४]।। *****

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६) परिस्तृणीत परिधत्ताग्निम्। परिहितोऽग्नि र्यजमानं भुनक्तु। अपाँ रस ओषधीनाँ सुवर्णः। निष्का इमे यजमानस्य सन्तु कामदुघाः। अमुत्रामुष्मिन् लोके। भूपते भुवनपते। महतो भूतस्य पते। ब्रह्माणन्त्वा वृणीमहे। अहं भूपतिरहं भुवनपतिः। अहं महतो भूतस्य पतिः। [५५]।।

देवेन सवित्रा प्रसूत आर्त्विज्यङ्-करिष्यामि। देवसवितरेतन्त्वा वृणते। बृहस्पतिन्दैव्यं ब्रह्माणम्। तदहं मनसे प्रब्रवीमि। मनो गायत्रियै। गायत्री त्रिष्टुभे।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिष्टुब्जगत्यै। जगत्यनुष्टुभे। अनुष्टुक्-पङ्क्त्यै। पङ्क्तिः प्रजापतये। [५६]।।

प्रजापति र्विश्वेभ्यो देवेभ्यः। विश्वेदेवा बृहस्पतये। बृहस्पति र्ब्रह्मणे। ब्रह्म भूर्भुव-स्सुवः। बृहस्पति र्देवानां ब्रह्मा। अहं मनुष्याणाम्। बृहस्पते यज्ञङ्गोपाय। इदन्तस्मै हर्म्यङ्करोमि। यो वो देवाश्चरति ब्रह्मचर्यम्। मेधावी दिक्षु मनसा तपस्वी। [५७]।।

अन्तर्दूतश्चरति मानुषीषु। चतुश्शिखण्डा युवतिस्सुपेशाः। घृतप्रतीका

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुवनस्य मद्ध्ये। मर्मृज्यमाना महते सौभगाय।
मह्यन्धुक्ष्व यजमानाय कामान्। भूमिर्भूत्वा
महिमानं पुपोष। ततो देवी वर्द्धयते पया॑ँसि।
यज्ञिया यज्ञ-व्विँचयन्ति शञ्च। ओषधीराप
इह शक्वरीश्च। यो मा हृदा मनसा यश्च
वाचा। [५८]।।

यो ब्रह्मणा कर्म्मणा द्वेष्टि देवाः।
यश्श्रुतेन हृदयेनेष्णता च। तस्येन्द्र वज्रेण
शिरश्छिनद्मि। ऊर्णामृदु प्रथमान॑ँस्योनम्।
देवेभ्यो जुष्ट॑ँसदनाय बर्हिः। सुवर्गे लोके
यजमान॑ँहि धेहि। मान्नाकस्य पृष्ठे परमे

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्योमन्न्। चतुश्शिखण्डा युवति स्सुपेशाः। घृतप्रतीका वयुनानि वस्ते। सास्तीर्यमाणा महते सौभगाय। [५९]।।

सा मे धुक्ष्व यजमानाय कामान्। शिवा च मे शग्मा चैधि। स्योना च मे सुषदा चैधि। ऊर्जस्वती च मे पयस्वती चैधि। इषमूर्जं मे पिन्वस्व। ब्रह्म तेजो मे पिन्वस्व। क्षत्रमोजो मे पिन्वस्व। विशं पुष्टिं मे पिन्वस्व। आयुरन्नाद्यं मे पिन्वस्व। प्रजां पशून्मे पिन्वस्व। [६०]।।

अस्मिन् यज्ञ उपभूय इन्नु मे।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

अविक्षोभाय परिधीन्दधामि। धर्ता धरुणो धरीयान्। अग्निर्द्वेषाँ सि निरितो नुदातै। विच्छिनद्मि विधृतीभ्याँ सपत्नान्। जातान् भ्रातृव्यान् ये च जनिष्यमाणाः। विशो यन्त्राभ्यां विधमाम्येनान्। अहँस्वानामुत्तमोऽसानि देवाः। विशो यन्त्रे नुदमाने अरातिम्। विश्वं पाप्मानममतिन्दुर्मरायुम्। [६१]।।

सीदन्ती देवी सुकृतस्य लोके। धृतीस्थो विधृती स्वधृती। प्राणान्मयि धारयतम्। प्रजां मयि धारयतम्। पशून्मयि धारयतम्। अयं प्रस्तर उभयस्य धर्ता।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्ता प्रयाजानामुतानूयाजानाम्। स दाधार समिधो विश्वरूपाः। तस्मिन्थ्स्रुचो अद्ध्यासादयामि। आरोह पथो जुहु देवयानान्। [६३]।।

यत्रऋषयः प्रथमजा ये पुराणाः। हिरण्यपक्षाऽजिरा संभृताङ्गा। वहासि मा सुकृताय्यँत्रलोकाः। अवाहंबाध उपभृता सपत्नान्। जातान्भ्रातृव्यान् ये च जनिष्यमाणाः। दोहै यज्ञ ँ सुदुघामिव धेनुम्। अहमुत्तरो भूयासम्। अधरे मथ्सपत्नाः। यो मा वाचा मनसा दुर्मरायुः। हृदाऽरातीयादभिदासदग्ने। [६३]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

इदमस्य चित्तमधरन्ध्रुवायाः। अहमुत्तरो भूयासम्। अधरे मथ्सपत्नाः। ऋषभोऽसि शाक्वरः। घृताचीनाँ सूनुः। प्रियेण नाम्ना प्रिये सदसि सीद। स्योनो मे सीद सुषदः पृथिव्याम्। प्रथयि प्रजया पशुभिस्सुवर्गे लोके। दिवि सीद पृथिव्यामन्तरिक्षे। अहमुत्तरो भूयासम्। [६४]।।

अधरे मथ्सपत्नाः। इयँ स्थाली घृतस्य पूर्णा। अच्छिन्नपया-श्शतधार उथ्सः। मारुतेन शर्मणा दैव्येन। यज्ञोऽसि सर्वत-श्श्रितः। सर्वतो मां भूतं भविष्यच्छ्रयताम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतं मे सन्त्वाशिषः। सहस्त्रं मे सन्तु सूनृताः। इरावतीः पशुमतीः। प्रजापतिरसि सर्वतश्श्रितः। [६५]।।

सर्वतो मां भूतं भविष्यच्छ्रयताम्। शतं मे सन्त्वाशिषः। सहस्त्रं मे सन्तु सूनृताः। इरावतीः पशुमतीः। इदमिन्द्रियममृत-व्वँीर्यम्। अनेनेन्द्राय पशवोऽचिकित्थसन्न्। तेन देवा अवतोप माम्। इहेषमूर्ज-य्यँशस्सह ओजस्सनेयम्। शृतं मयि श्रयताम्। यत्पृथिवीमचरत्तत्प्रविष्टम्। [६६]।।

येनासिञ्चद्बलमिन्द्रे प्रजापतिः।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

इदन्तच्छुक्रं मधु वाजिनीवत्। येनोपरिष्टा-दधिनोन्महेन्द्रम्। दधि मान्धिनोतु। अयव्वेँदः पृथिवीमन्वविन्दत्। गुहासतीङ्गहने गह्वरेषु। स विन्दतु यजमानाय लोकम्। अच्छिद्रय्यँज्ञं भूरिकर्मा करोतु। अय- य्यँज्ञ- स्समसद-द्धविष्मान्। ऋचा साम्ना यजुषा देवताभिः। [६७]॥

तेन लोकान्थ्सूर्यवतो जयेम। इन्द्रस्य सख्यममृतत्वमश्याम्। योनः कनीय इह कामयातै। अस्मिन् यज्ञे यजमानाय मह्यम्। अपतमिन्द्राग्नी भुवनान्नुदेताम्। अहं प्रजा-

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्वीँरवती- व्विँदेय। अग्ने वाजजित्। वाजन्त्वा सरिष्यन्तम्। वाजञ्जेष्यन्तम्। वाजिन-व्वाँजजितम्। [६८]।।

वाजजित्यायै सम्मार्ज्मि। अग्निमन्नाद-मन्नाद्याय। उपहूतो द्यौः पिता। उप मान्द्यौः पिता ह्वयताम्। अग्निराग्नीद्ध्रात्। आयुषे वर्चसे। जीवात्वै पुण्याय। उपहूता पृथिवी माता। उप मां माता पृथिवी ह्वयताम्। अग्निराग्नीद्ध्रात्। [६९]।।

आयुषे वर्चसे। जीवात्वै पुण्याय। मनो ज्योति जुषतामाज्यम्। विच्छिन्नय्यँज्ञ॰

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

समिमन्दधातु। बृहस्पति-स्तनुतामिमन्नः।
विश्वेदेवा इह मादयन्ताम्। यन्ते अग्न
आवृश्चामि। अहव्वाँ क्षिपितश्चरन्न्। प्रजाञ्च
तस्य मूलञ्च। नीचै र्देवा निवृश्चत।[७०]।।

अग्ने यो नोऽभिदासति। समानो
यश्च निष्ट्यः। इद्ध्मस्येव प्रक्षायतः।
मातस्योच्छेषि किञ्चन। यो मान्द्वेष्टि
जातवेदः। यञ्चाहन्द्वेष्मि यश्च माम्। सर्वाँ
स्तानग्ने सन्दह। याँ श्चाहन्द्वेष्मि ये च
माम्। अग्ने वाजजित्। वाजन्त्वा ससृवाँ-
सम्। [७१]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाजञ्जिगिवाꣳ सम्। वाजिन-व्वाँज-जितम्। वाजजित्यायै सम्मार्ज्मि। अग्निमन्नाद मन्नाद्याय। वेदिं बर्हिश्शृतꣳ हविः। इद्ध्मः परिधय स्स्रुचः। आज्य य्यँज्ञ ऋचो यजुः। याज्याँश्च वषट्काराः। सम्मे सन्नतयो नमन्ताम्। इद्ध्म सन्नहने हुते। [७२]।।

दिवः खीलोऽवततः। पृथिव्या अद्ध्युत्थितः। तेनासहस्रकाण्डेन। द्विषन्तꣳ शोचयामसि। द्विषन्मे बहुशोचतु। ओषधे मो अहꣳशुचम्। यज्ञ नमस्ते यज्ञ। नमो नमश्च ते यज्ञ। शिवेन मे सन्तिष्ठस्व। स्योनेन मे

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्तिष्ठस्व। [७३]।।

सुभूतेन मे सन्तिष्ठस्व। ब्रह्मवर्चसेन मे सन्तिष्ठस्व। यज्ञस्यर्द्धिमनु सन्तिष्ठस्व। उप ते यज्ञ नमः। उप ते नमः। उप ते नमः। त्रिष्फली क्रियमाणानाम्। योन्यङ्गो अवशिष्यते। रक्षसां भागधेयम्। आपस्तत्-प्रवहतादितः। [७४]।।

उलूखले मुसले यच्च शूर्पे। आशिश्लेष दृषदि यत्कपाले। अवप्रुषो विप्रुष-स्सय्ँयजामि। विश्वेदेवा हविरिदञ्जुषन्ताम्। यज्ञे या विप्रुष- स्सन्ति बह्वीः।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्नौ तास्सर्वा-स्स्विष्टा-स्सुहुता जुहोमि। उद्यन्नद्य मित्रमहः। सपत्नान्मे अनीनशः। दिवैनान् विद्युता जहि। निम्रोचन्नधराङ्कृधि। [७५]।।

उद्यन्नद्य विनो भज। पिता पुत्रेभ्यो यथा। दीर्घायुत्त्वस्य हेशिषे। तस्य नो देहि सूर्य। उद्यन्नद्य मित्रमहः। आरोहन्नुत्तरान्दिवम्। हृद्रोगं मम सूर्य। हरिमाणञ्च नाशय। शुकेषु मे हरिमाणम्। रोपणाकासु दद्ध्मसि।[७६]

अथो हारिद्रवेषु मे। हरिमाण-न्निदद्ध्मसि। उदगादयमादित्यः। विश्वेन

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहसा सह। द्विषन्तं मम रन्धयन्न्। मो अहन्द्विषतो रधम्। यो नश्शपादशपतः। यश्च नः श्शपतश्शपात्। उषाश्च तस्मै निम्रुक्च। सर्वं पाप ँ समूहताम्। [७७]।।

यो नस्सपत्नो यो रणः। मर्तोऽभिदासति देवाः। इद्ध्मस्येव प्रक्षायतः। मातस्योच्छेषि किञ्चन। अवसृष्टः परापत। शरो ब्रह्मस ँ शितः। गच्छामित्रान्प्रविश। मैषाङ्कञ्चनोच्छिषः। [७८]।। *****

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(७) सक्षेदं पश्य। विधर्तरिदं पश्य। नाकेदं पश्य। रमतिः पनिष्ठा। ऋतव्ँर्षिष्ठम्। अमृतायान्याहुः। सूर्यो वरिष्ठो अक्षभिर्विभाति। अनुद्यावापृथिवी देवपुत्रे। दीक्षाऽसि तपसो योनिः। तपोऽसि ब्रह्मणो योनिः। [७९]।।

ब्रह्मासि क्षत्रस्य योनिः। क्षत्रमस्यृतस्य योनिः। ऋतमसि भूरारभे। श्रद्धां मनसा। दीक्षान्तपसा। विश्वस्य भुवनस्याधिपत्नीम्। सर्वे कामा यजमानस्य सन्तु। वातं प्राणं मनसाऽन्वारभामहे। प्रजापतिर्य्यो भुवनस्य

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोपाः। स नो मृत्योस्त्रायतां पात्वꣳ हसः। [८०]।।

ज्योग्जीवा जरामशीमहि। इन्द्रशाक्वर गायत्रीं प्रपद्ये। तान्ते युनज्मि। इन्द्रशाक्वर त्रिष्टुभं प्रपद्ये। तान्ते युनज्मि। इन्द्रशाक्वर जगतीं प्रपद्ये। तान्ते युनज्मि। इन्द्रशाक्वरानुष्टुभं प्रपद्ये। तान्ते युनज्मि। इन्द्रशाक्वर पङ्क्तिं प्रपद्ये। [८१]।।

तान्ते युनज्मि। आऽहन्दीक्षामरुहमृतस्य पत्नीम्। गायत्रेण छन्दसा ब्रह्मणा च। ऋतꣳसत्येऽधायि। सत्यमृतेऽधायि।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋतञ्च मे सत्यञ्चाभूताम्। ज्योतिरभूवꣳ सुवरगमम्। सुवर्गल्लौँकन्नाकस्य पृष्ठम्। ब्रद्ध्नस्य विष्टपमगमम्।

पृथिवी दीक्षा। [८२]।। तयाऽग्नि र्दीक्षया दीक्षितः। ययाऽग्नि र्दीक्षया दीक्षितः। तया त्वा दीक्षया दीक्षयामि।

अन्तरिक्षन्दीक्षा। तया वायु र्दीक्षया दीक्षितः। यया वायु र्दीक्षया दीक्षितः। तया त्वा दीक्षया दीक्षयामि।

द्यौर्दीक्षा। तयाऽऽदित्यो दीक्षया दीक्षितः। ययाऽऽदित्यो दीक्षया दीक्षितः। [८३]

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तया त्वा दीक्षया दीक्षयामि।

दिशोदीक्षा। तया चन्द्रमा दीक्षया दीक्षितः। यया चन्द्रमा दीक्षया दीक्षितः। तया त्वा दीक्षया दीक्षयामि।

आपो दीक्षा। तया वरुणो राजा दीक्षया दीक्षितः। यया वरुणो राजा दीक्षया दीक्षितः। तया त्वा दीक्षया दीक्षयामि।

ओषधयो दीक्षा। [८४]।।

तया सोमो राजा दीक्षया दीक्षितः। यया सोमो राजा दीक्षया दीक्षितः। तया त्वा दीक्षया दीक्षयामि।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाग्दीक्षा। तया प्राणो दीक्षया दीक्षितः। यया प्राणो दीक्षया दीक्षितः। तया त्वा दीक्षया दीक्षयामि।

पृथिवी त्वा दीक्षमाणमनु दीक्षताम्।

अन्तरिक्षन्त्वा दीक्षमाणमनु दीक्षताम्।

द्यौस्त्वा दीक्षमाणमनु दीक्षताम्।[८५]।

दिशस्त्वा दीक्षमाणमनु दीक्षन्ताम्।

आपस्त्वा दीक्षमाणमनु दीक्षन्ताम्।

ओषधयस्त्वा दीक्षमाणमनु दीक्षन्ताम्।

वाक्त्वा दीक्षमाणमनु दीक्षताम्।

ऋचस्त्वा दीक्षमाणमनु दीक्षन्ताम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामानि त्वा दीक्षमाणमनु दीक्षन्ताम्।
यजूँषि त्वा दीक्षमाणमनु दीक्षन्ताम्।
अहश्च रात्रिश्च। कृषिश्च वृष्टिश्च।
त्विषिश्चापचितिश्च। [८६]।।

आपश्चौषधयश्च। ऊर्क्च सूनृता च। तास्त्वा दीक्षमाणमनु दीक्षन्ताम्। स्वे दक्षे दक्षपितेह सीद। देवानाँ सुम्नो महते रणाय। स्वासस्थ-स्तनुवा सव्विँशस्व। पितेवैधि सूनव आसुशेवः। शिवो मा शिवमाविश। सत्यं म आत्मा। श्रद्धा मेऽक्षितिः। [८७]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपो मे प्रतिष्ठा। सवितृ प्रसूतामादिशो दीक्षयन्तु। सत्यमस्मि। अहन्त्वदस्मि मदसि त्वमेतत्। ममासि योनिस्तव योनिरस्मि। ममैव सन्वह हव्यान्यग्ने। पुत्रः पित्रे लोककृज्जातवेदः। आजुह्वानस्सुप्रतीकः पुरस्तात्। अग्ने स्वा-य्यँोनिमासीद साद्ध्या। अस्मिन्थ्सधस्थे अद्ध्युत्तरस्मिन्। [८८]।।

विश्वे देवा यजमानश्च सीदत। एकमिषे विष्णुस्त्वाऽन्वेतु। द्वे ऊर्जे विष्णुस्त्वाऽन्वेतु। त्रीणि व्रताय विष्णु-

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्वाऽन्वेतु। चत्वारि मायोभवाय विष्णु-
स्त्वाऽन्वेतु। पञ्च पशुभ्यो विष्णु-
स्त्वाऽन्वेतु। षड्रायस्पोषाय विष्णुस्त्वाऽन्वेतु
सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वाऽन्वेतु।
सखाय- स्सप्तपदा अभूम। सख्यन्ते
गमेयम्। [८९]।।

सख्यात्ते मायोषम्। सख्यान्मे
मायोष्ठाः। साऽसि सुब्रह्मण्ये। तस्यास्ते
पृथिवी पादः। साऽसि सुब्रह्मण्ये। तस्यास्ते-
ऽन्तरिक्षं पादः। साऽसि सुब्रह्मण्ये।
तस्यास्ते द्यौः पादः। साऽसि सुब्रह्मण्ये।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्यास्ते दिशः पादः। [९०]।।

परोरजास्ते पञ्चमः पादः। सा न इषमूर्जन्धुक्ष्व। तेज इन्द्रियम्। ब्रह्मवर्चसमन्नाद्यम्। विमिमेत्वा पयस्वतीम्। देवानान्धेनुँ सुदुघामनपस्फुरन्तीम्। इन्द्रस्सोमं पिबतु। क्षेमो अस्तु नः। इमान्नराः कृणुत वेदिमेत्य। वसुमतीँ रुद्रवतीमादित्यवतीम्। [९१]।।

वर्ष्मन्दिवः। नाभा पृथिव्याः। यथाऽय-य्यँजमानो नरिष्येत्। देवस्य सवितुस्सवे। चतुश्शिखण्डा युवतिस्सुपेशाः।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

घृतप्रतीका भुवनस्य मद्ध्ये। तस्या ँ सुपर्णावधियौ निविष्टौ। तयो र्देवानामधि भागधेयम्। अपजन्यं भयन्नुद। अपचक्राणि वर्तय। गृह ँ सोमस्य गच्छतम्। न वा उवेतन्म्रियसे न रिष्यसि। देवा ँ इदेषि पथिभिस्सुगेभिः। यत्र यन्ति सुकृतो नापि दुष्कृतः। तत्र त्वा देवस्सविता दधातु।[९२]

(८) यदस्य पारे रजसः। शुक्रञ्ज्योतिरजायत। तन्नः पर्षदति द्विषः। अग्ने वैश्वानर-स्स्वाहा। यस्माद्भीषाः। ऽवाशिष्ठाः। ततो नो अभयङ्कृधि।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रजाभ्य-स्सर्वाभ्यो मृड। नमो रुद्राय मीढुषे। यस्माद्भीषा न्यषदः। ततो नो अभयङ्कृधि। [९३]।।

प्रजाभ्य-स्सर्वाभ्यो मृड। नमो रुद्राय मीढुषे। उदुस्त्रतिष्ठ प्रतितिष्ठ मारिषः। मेम-य्यँज्ञ-य्यँजमानञ्च रीरिषः। सुवर्गे लोके यजमानँ हि धेहि। शन्न एधि द्विपदे शञ्चतुष्पदे। यस्माद्भीषाऽवेपिष्ठाः पलायिष्ठा स्समज्ञास्थाः। ततो नो अभयङ्कृधि। प्रजाभ्य स्सर्वाभ्यो मृड। नमो रुद्राय मीढुषे। [९४]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

य इदमर्कः। तस्मै नमः। तस्मै स्वाहा। न वा उवेतन्म्रियसे। आशानान्त्वा विश्वा आशाः। यज्ञस्य हि स्थ ऋत्वियौ। इन्द्राग्नी चेतनस्य च। हुताहुतस्य तृप्यतम्। अहुतस्य हुतस्य च। हुतस्य चाहुतस्य च। अहुतस्य हुतस्य च। इन्द्राग्नी अस्य सोमस्य। वीतं पिबतञ्जुषेथाम्। मा यजमानन्तमो विदत्। मर्त्त्विजोमो इमाः प्रजाः। मायस्सोममिमं पिबात्। सँसृष्टमुभयङ्कृतम्।। [९५]।। ****

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९) अनागसस्त्वा वयम्। इन्द्रेण प्रेषिता उप। वायुष्टे अस्त्वँ शभूः। मित्रस्ते अस्त्वँ शभूः। वरुणस्ते अस्त्वँ शभूः। अपाङ्क्षया ऋतस्य गर्भाः। भुवनस्य गोपा श्श्येना अतिथयः। पर्वतानाङ्ककुभः प्रयुतो न पातारः। वग्नुनेन्द्रँ ह्वयत। घोषेणामीवाँ -श्चातयत। [९६]॥

युक्तास्थ वहत। देवा ग्रावाण इन्दुरिन्द्र इत्यवादिषुः। एन्द्रमचुच्यवुः परमस्याः परावतः। आऽस्माथ्सधस्थात्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओरोरन्तरिक्षात्। आ सुभूतमसुषवुः। ब्रह्मवर्चसं म आसुषवुः। समरे रक्षाँस्यवधिषुः। अपहतं ब्रह्मज्यस्य।

वाक्च त्वा मनश्च श्रीणीताम्। [९७]।

प्राणश्च त्वाऽपानश्च श्रीणीताम्।

चक्षुश्च त्वा श्रोत्रञ्च श्रीणीताम्।

दक्षश्च त्वा बलञ्च श्रीणीताम्।

ओजश्च त्वा सहश्च श्रीणीताम्।

आयुश्च त्वा जरा च श्रीणीताम्।

आत्मा च त्वा तनूश्च श्रीणीताम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृतोऽसि शृतङ्कृतः। शृताय त्वा शृतेभ्यस्त्वा। यमिन्द्रमाहु र्वरुणय्यँमाहुः। यं मित्रमाहुर्यमु सत्यमाहुः। [९८]।।

यो देवानान्देवतम स्तपोजाः। तस्मै त्वा तेभ्यस्त्वा। मयित्यदिन्द्रियं महत्। मयि दक्षो मयि क्रतुः। मयि धायि सुवीर्यम्। त्रिशुग्घर्मो विभातु मे। आकूत्या मनसा सह। विराजा ज्योतिषा सह। यज्ञेन पयसा सह। तस्य दोहमशीमहि। [९९]।।

तस्य सुम्नमशीमहि। तस्य भक्षमशीमहि। वाग्जुषाणा सोमस्य तृप्यतु।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्रो जनान्प्रसमित्र। यस्मान्न जातः परो अन्यो अस्ति। य आविवेश भुवनानि विश्वा। प्रजापतिः प्रजया सँविदानः। त्रीणि ज्योतीꣳषि सचते स षोडशी। एष ब्रह्मा य ऋत्वियः। इन्द्रो नाम श्रुतो गणे। [१००]।।

प्रतेमहे विदथे शꣳसिषꣳहरी। य ऋत्वियः प्रतेवन्वे। वनुषो हर्यतं मदम्। इन्द्रो नाम घृतन्नयः। हरिभिश्चारु सेचते। श्रुतो गण आत्वा विशन्तु। हरिवर्पसङ्-गिरः। इन्द्राधिपतेऽधिपतिस्त्वन्देवानामसि। अधिपतिं माम्। आयुष्मन्त-व्वँर्चस्वन्तम्

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुष्येषु कुरु। [१०१]।।

इन्द्रश्च सम्राड् वरुणश्च राजा। तौ ते भक्षञ्चक्रतुरग्र एतम्। तयोरनु भक्षं भक्षयामि। वाग्जुषाणा सोमस्य तृप्यतु। प्रजापति र्विश्वकर्मा। तस्य मनोदेव-य्यँज्ञेन राद्ध्यासम्। अर्त्थेगा अस्य जहितः। अवसानपतेऽवसानं मे विन्द। नमो रुद्राय वास्तोष्पतये। आयने विद्रवणे।[१०२]।।

उद्याने यत्परायणे। आवर्तने विवर्तने। यो गोपायति तꣳहुवे। यान्यपामित्यान्य प्रतीत्तान्यस्मि। यमस्य बलिना

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चरामि। इहैव सन्तः प्रतितद्यातयामः।
जीवा जीवेभ्यो निहराम एनत्। अनृणा
अस्मिन्ननृणाः परस्मिन्। तृतीये लोके
अनृणास्स्याम। ये देवयाना उतपितृयाणाः।
[१०३]।।

सर्वान्पथो अनृणा आक्षीयेम।
इदमूनु श्रेयोऽवसानमाऽगन्म। शिवे नो
द्यावापृथिवी उभे इमे। गोमद्धनवदश्ववदूर्जस्वत्। सुवीरा वीरैरनु सञ्चरेम। अर्कः
पवित्रꣳ रजसो विमानः। पुनाति देवानां
भुवनानि विश्वा। द्यावापृथिवी पयसा

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सव्विँदाने। घृतन्दुहाते अमृतं प्रपीने। पवित्रमर्को रजसो विमानः। पुनाति देवानां भुवनानि विश्वा॥ सुवर्ज्योति र्यशो महत्। अशीमहि गाधमुत प्रतिष्ठाम्। [१०४]॥

(१०) उदस्तांफ्सीथ्सविता मित्रो अर्यमा। सर्वानमित्रानवधीद्युगेन। बृहन्तं मामंकरद्वीरवन्तम्। रथन्तरे श्रयस्व स्वाहा पृथिव्याम्। वामदेव्ये श्रयस्व स्वाहाऽन्तरिक्षे। बृहति श्रयस्व स्वाहा दिवि। बृहता त्वोपस्तभ्नोमि। आत्वाददे यशसे वीर्याय च। अस्मास्वघ्नियाः यूयन्दधाथेन्द्रियं पयः।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्ते द्रप्सो यस्त उदरूषः। [१०५]।।

देव्यः केतुर्विश्वं भुवनमाविवेश।
स नः पाह्यरिष्ट्यै स्वाहा। अनु मा सर्वो
यज्ञोऽयमेतु। विश्वे देवा मरुत-स्सामार्कः।
आप्रियश्छन्दाँसि निविदो यजूँषि।
अस्यै पृथिव्यै यद्यज्ञियम्। प्रजापते
र्वतनिमनु वर्तस्व। अनु वीरैरनु राद्ध्याम
गोभिः। अन्वश्वैरनु सर्वैरुपुष्टैः।
अनुप्रजयाऽन्विन्द्रियेण। [१०६]।।

देवानो यज्ञमृजुधा नयन्तु। प्रतिक्षत्रे
प्रतितिष्ठामि राष्ट्रे। प्रत्यश्वेषु प्रतितिष्ठामि

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोषु। प्रतिप्रजायां प्रतितिष्ठामि भव्ये। विश्वमन्याऽभि वावृधे। तदन्यस्यामधि श्रितम्। दिवे च विश्वकर्मणे। पृथिव्यै चाकरन्नमः। अस्कान्द्यौः पृथिवीम्। अस्कानृषभो युवागाः। [१०७]।।

स्कन्नेमा विश्वा भुवना। स्कन्नो यज्ञः प्रजनयतु। अस्कानजनि प्राजनि। आस्कन्नाज्जायते वृषा। स्कन्नात्प्रजनिषीमहि। ये देवा येषामिदं भागधेयं बभूव। येषां प्रयाजा उतानूयाजाः। इन्द्रज्येष्ठेभ्यो वरुण राजभ्यः। अग्निहोतृभ्यो देवेभ्य स्स्वाहा।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उतत्यानो दिवा मतिः। [१०८]।।

अदितिरूत्याऽगमत्। सा शन्ताची मयस्करत्। अपस्त्रिधः। उतत्या दैव्या भिषजा। शन्नस्करतो अश्विना। यूयातामस्मद्रपः। अपस्त्रिधः। शमग्नि-रग्निभि-स्करत्। शन्नस्तपतु सूर्यः। श व्वाँतो वात्वरपाः। [१०९]।।

अपस्त्रिधः। तदित्पदन्न विचिकेत विद्वान्। यन्मृतः पुनरप्येति जीवान्। त्रिवृद्यद्भुवनस्य रथवृत्। जीवो गर्भो न मृतस्स जीवात्। प्रत्यस्मै पिपीषते।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वानि विदुषे भर। अरङ्गमाय जग्मवे।
अपश्चाद्दघ्वने नरे। इन्दुरिन्दुमवागात्।
इन्दोरिन्द्रोऽपात्। तस्य त इन्दविन्द्रपीतस्य
मधुमतः। उपहूतस्योपहूतो भक्षयामि।[११०]

(११) ब्रह्म प्रतिष्ठा मनसो ब्रह्म
वाचः। ब्रह्म यज्ञानाँ हविषामाज्यस्य।
अतिरिक्तङ्कर्मणो यच्च हीनम्। यज्ञः
पर्वाणि प्रतिरन्नेति कल्पयन्न्। स्वाहाकृता-
ऽऽहुतिरेतु देवान्। आश्रावितमत्या-
श्रावितम्। वषट्कृतमत्यनूक्तञ्च यज्ञे।
अतिरिक्तङ्कर्मणो यच्च हीनम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन्न्। स्वाहा-
कृताऽऽहुतिरेतु देवान्। [१११]।।

यद्वो देवा अतिपादयानि। वाचा
चित्प्रयत-न्देवहेडनम्। अरायो अस्माँ
अभिदुच्छुनायते। अन्यत्रास्मन्मरुत-
स्तन्निधेतन। ततम्म आपस्तदुतायते पुनः।
स्वाधिष्ठाधीतिरुचथाय शस्यते। अयँ
समुद्र उत विश्वभेषजः। स्वाहाकृतस्य
समुतृप्णुतर्भुवः। उद्वयन्तमसस्परि।
उदुत्यञ्चित्रम्। [११२]।।

इमं मे वरुण तत्त्वा यामि।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

त्वन्नो अग्ने सत्वन्नो अग्ने। त्वमग्ने
अयासि प्रजापते। इमञ्जीवेभ्यः परिधि-
न्दधामि। मैषान्नुगादपरो अर्द्धमेतम्।
शतञ्जीवन्तु शरदः पुरूचीः। तिरो मृत्यु-
न्दधतां पर्वतेन। इष्टेभ्य- स्स्वाहा
वषडनिष्टेभ्य स्स्वाहा। भेषजन्दुरिष्ट्यै
स्वाहा निष्कृत्यै स्वाहा। दौरार्द्ध्यै स्वाहा
दैवीभ्य स्तनूभ्य स्स्वाहा। [११३]।।

ऋद्ध्यै स्वाहा समृद्ध्यै स्वाहा।
यत इन्द्र भयामहे। ततो नो अभयङ्कृधि।
मघवञ्छग्धि तव तन्न ऊतये।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्विषो विमृधो जहि। स्वस्तिदा विशस्पतिः। वृत्रहा विमृधो वशी। वृषेन्द्रः पुर एतु नः। स्वस्तिदा अभयङ्करः। आभि र्गीर्भि र्यदतोन ऊनम्। [११४]।।

आप्यायय हरिवो वर्द्धमानः। यदा स्तोतृभ्यो महि गोत्रा रुजासि। भूयिष्ठभाजो अधते स्याम। अनाज्ञात-य्यँदाज्ञातम्। यज्ञस्य क्रियते मिथु। अग्ने तदस्य कल्पय। त्व ँ हि वेत्थ यथातथम्। पुरुष-सम्मितो यज्ञः। यज्ञः पुरुषसम्मितः। अग्ने तदस्य कल्पय। त्व ँ हि वेत्थ यथातथम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्पाकत्रा मनसा दीनदक्षान। यज्ञस्य मन्वते मर्तासः। अग्निष्टद्धोता क्रतुविद्विजानन्। यजिष्ठो देवाँ ऋतुशो यजाति। [११५]।। *****

(१२) यद्देवा देवहेडनम्। देवासश्चकृमा वयम्। आदित्यास्तस्मान्मा मुञ्चत। ऋतस्यर्तेन मामुत। देवा जीवन काम्या यत्। वाचाऽनृतमूदिम। अग्निर्मा तस्मादेनसः। गार्हपत्यः प्रमुञ्चतु। दुरिता यानि चकृम। करोतु मामनेनसम्।[११६]।

ऋतेन द्यावापृथिवी। ऋतेन त्वँ

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

सरस्वति। ऋतान्मा मुञ्चता॑ँ हसः। यदन्यकृतमारिम। सजातश॑ँ सादुतवा जामिश॑ँ सात्। ज्यायसश्श॑ँ सादुत वा कनीयसः। अनाज्ञात-न्देवकृत-य्यँदेनः। तस्मात्वमस्मा-ञ्जातवेदो मुमुग्धि। यद्वाचा यन्मनसा। बाहुभ्यामूरुभ्यामष्ठीवद्भ्याम्। [११७]।।

शिश्नै र्यदनृतञ्चकृमा वयम्। अग्निर्मा तस्मादेनसः। यद्धस्ताभ्याञ्चकर किल्बिषाणि। अक्षाणा- व्वँग्नुमुप जिघ्नमानः। दूरे पश्या च राष्ट्रभृच्च।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तान्यप्सरसा-वनुदत्ता-मृणानि। अदीव्यन्नृण-
य्यँदहञ्चकार। यद्वाऽदास्यन्- थ्सञ्जगारा
जनेभ्यः। अग्निर्मा तस्मादेनसः। यन्मयि
माता गर्भे सति। [११८]।।

एनश्चकारयत्पिता। अग्निर्मा
तस्मादेनसः। यदापिपेष मातरं पितरम्।
पुत्रः प्रमुदितो धयन्न्। अहिँ सितौ पितरौ
मया तत्। तदग्ने अनृणो भवामि।
यदन्तरिक्षं पृथिवीमुत द्याम्। यन्मातरं
पितरव्वाँजिहिँसिम। अग्निर्मा तस्मादेनसः।
यदाशसा निशसा यत्पराशसा। [११९]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदेनश्चकृमानूतन य्यँत्पुराणम्।
अग्निर्मा तस्मादेनसः। अतिक्रामामि दुरित
य्यँदेनः। जहामि रिप्रं परमे सधस्थे। यत्र
यन्ति सुकृतो नापि दुष्कृतः। तमारोहामि
सुकृतान्नु लोकम्। त्रिते देवा अमृजतैतदेनः।
त्रित एतन्मनुष्येषु मामृजे। ततो मा यदि
किञ्चिदानशे। अग्निर्मातस्मादेनसः।[१२०]

गार्हपत्यः प्रमुञ्चतु। दुरिता यानि
चकृम। करोतु मामनेनसम्। दिवि जाता
अप्सु जाताः। या जाता ओषधीभ्यः।
अथो या अग्निजा आपः। तानश्शुन्धन्तु

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुन्धनीः। यदापो नक्तन्दुरितञ्चराम। यद्वा
दिवा नूतन-य्यँत्पुराणम्। हिरण्यवर्णास्तत
उत्पुनीतनः। इमं मे वरुण तत्त्वा यामि।
त्वन्नो अग्ने सत्वन्नो अग्ने। त्वमग्ने
अयासि। [१२१]।। *****

(१३) यत्ते ग्राव्णाचिच्छिदु-
स्सोमराजन्न्। प्रियाण्यङ्गानि स्वधिता
परूᳪषि। तथ्सन्धथ्स्वाज्येनोत वर्द्धयस्व।
अनागसो अधमिथ्सङ्क्षयेम। यत्ते ग्रावा
बाहुच्युतो अचुच्यवुः। नरो यत्ते दुदुहु
र्दक्षिणेन। तत्त आप्यायतान्तत्ते।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्ट्यायता-न्देवसोम। यत्ते त्वचं बिभिदु-र्यच्च योनिम्। यदास्थानात्प्रच्युतो वेनसित्मना। [१२२]।।

त्वया तथ्सोम गुप्तमस्तु नः। सा न-स्सन्धाऽसत्परमे व्योमन्न्। अहाच्छरीरं पयसा समेत्य। अन्योन्यो भवति वर्णो अस्य। तस्मिन्वयमुपहूतास्तवस्मः। आनो भज सदसि विश्वरूपे। नृचक्षास्सोम उत शुश्रुगस्तु। मा नो विहासीद् गिर आवृणानः। अनागास्तनुवो वावृधानः। आनो रूप ँ्वहतु जायमानः। [१२३]।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपक्षरन्ति जुह्वो घृतेन। प्रियाण्यङ्गानि तव वर्द्धयन्तीः। तस्मै ते सोम नम इद्वषट् च। उप मा राजन्थ्सुकृते ह्वयस्व। संप्राणापानाभ्या ँ समु चक्षुषा त्वम्। स ँ श्रोत्रेण गच्छस्व सोम राजन्न्। यत्त आस्थित ँ शमु तत्ते अस्तु। जानीतान्न स्सङ्गमने पथीनाम्। एतञ्जानीतात् परमे व्योमन्न्। वृकास्सधस्थाविदरूपमस्य। [१२४]

यदागच्छात्पथिभि र्देवयानैः। इष्टापूर्ते कृणुतादाविरस्मै। अरिष्टो राजन्नगदः परेहि। नमस्ते अस्तु चक्षसेरघूयते। नाकमारोह सह

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

यजमानेन। सूर्यङ्गच्छतात्परमे व्योमन्न्।
अभूद्देवस्सविता वन्द्योनुनः। इदानीमह्न
उपवाच्यो नृभिः। वियोरत्ना भजति
मानवेभ्यः। श्रेष्ठन्नो अत्र द्रविणय्यँथा दधत्।
उप नो मित्रावरुणा- विहावतम्।
अन्वादीद्ध्याथामिह न स्सखाया।
आदित्यानां प्रसितिर्हेतिः। उग्राशतापाष्ठा
घविषा परिणो वृणक्तु। आप्यायस्व सन्ते।।
[१२५]।। *****

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१४) यद्दिदीक्षे मनसा यच्च
वाचा। यद्वा प्राणै-श्चक्षुषा यच्च श्रोत्रेण।
यद्रेतसा मिथुनेनाप्यात्मना। अद्भ्यो लोका
दधिरे तेज इन्द्रियम्। शुक्रा दीक्षायै तपसो
विमोचनीः। आपो विमोक्त्री र्मयि तेज
इन्द्रियम्। यदृचा साम्ना यजुषा।
पशूनाञ्चर्मन् हविषा दिदीक्षे।
यच्छन्दोभिरोषधीभि र्वनस्पतौ। अद्भ्यो
लोका दधिरे तेज इन्द्रियम्। [१२६]।।

शुक्रा दीक्षायै तपसो विमोचनीः।
आपो विमोक्त्री र्मयि तेज इन्द्रियम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

येन ब्रह्म येन क्षत्रम्। येनेन्द्राग्नी प्रजापतिस्सोमो वरुणो येन राजा। विश्वे देवा ऋषयो येन प्राणाः। अद्भ्यो लोका दधिरे तेज इन्द्रियम्। शुक्रा दीक्षायै तपसो विमोचनीः। आपो विमोक्त्री मयि तेज इन्द्रियम्। अपां पुष्पमस्योषधीनाँ रसः। सोमस्य प्रियन्धाम। [१२७]।।

अग्नेः प्रियतमँ हवि स्स्वाहा। अपां पुष्पमस्योषधीनाँ रसः। सोमस्य प्रियन्धाम। इन्द्रस्य प्रियतमँहवि स्स्वाहा। अपां पुष्पमस्योषधीनाँरसः। सोमस्य

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

प्रियन्धाम। विश्वेषान्देवानां प्रियतमꣳ हविस्स्वाहा। वयꣳ सोमव्रते तव। मनस्तनूषु पिप्रतः। प्रजावन्तो अशीमहि। [१२८]।।

देवेभ्यः पितृभ्य स्स्वाहा। सोम्येभ्यः पितृभ्य स्स्वाहा। कव्येभ्यः पितृभ्य स्स्वाहा। देवास इह मादयद्ध्वम्। सोम्यास इह मादयद्ध्वम्। कव्यास इह मादयद्ध्वम्। अनन्तरिताः पितर स्सोम्या-स्सोमपीथात्। अपैतु मृत्युरमृतन्न आगन्न्। वैवस्वतो नो अभङ्कृणोतु। पर्ण व्वँनस्पतेरिव। [१२९]

अभिनश्शीयताꣳरयिः। सचतान्न

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्शचीपतिः। परं मृत्यो अनु परेहि पन्थाम्। यस्ते स्व इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि। मा नः प्रजाँ रीरिषो मोत वीरान्। इदमूनु श्रेयोऽवसानमागन्म। यद्गोजि-द्धनजि-दश्वजिद्यत्। पर्णव्वँन-स्पतेरिव। अभिनश्शीयताँ रयिः। सचतान्न श्शचीपतिः।। [१३०]।। *****

।। हरिः ओ(३)म् ।।

।। इति तैत्तिरीय यजुर्ब्राह्मणे तृतीयाष्टके
सप्तमः प्रश्नस्समाप्तः ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

१. दधाति यज्ञ उतु एकन्धयन्ति रुन्धे कुर्यादार्च्छत्यपाकुर्यात् पृथिवीत्वमुष्टौ च।।

२. वै प्रजापति स्स्थापयति प्रजानभिभि जुहुयाथ्स्यद्भ्रियेत जहामु त्रीणि च।।

यद्विष्वण्णेन प्राजापत्ययर्चा यत्कीटा मंदूध्यमेन यदववृष्टेन यत्पूर्वस्या य्यँत्पुरा प्रयाजेभ्यः प्राङ्ङ्गारो यद्दक्षिणा यत्प्रत्यक्।।

३. अजाऽग्नावेवास्याँग्निहोत्रँ हुतं भवति भवत्यासीत परिचक्षीत लम्भयति दधाति देवानां बृहस्पतिः पञ्च च।।

४. आभृत इमङ्गृह्णामि पूर्वस्ताः पूर्वः परिगृह्णामि सभापाला इन्द्रज्येष्ठेभ्य आदित्य व्रतपते सुसंभृत मे सह पुनातु गहि नो विश्वरूपा दधातु पुनर्गच्छतु पशून्।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५. अभीत्वर्यै करोमि क्रमीत्पिताऽऽत्मन
एकतो मुखां मे दिशो ऽ दुध्यक्षेभ्यो हविर्गार्हपत्या
कल्पयन्नशस्ति स्सानो दोहता॰ सुवीर्य॰ सप्त च।।

६. पतिः प्रजापतये तपस्वी वाचा
सौभगाय पशून्मे पिन्वस्व दुर्म-रायुन्देवयानानग्ने
ऽन्तरिक्षेऽहमुत्तरो भूयासं प्रजापतिरसि सर्वतश्श्रितः
प्रविष्टन्देवताभि र्वाजजितं पृथिवी ह्वयतामग्नि-
राग्नीद्ध्राद्ध्रश्चत ससृवा॰ स॰ हुतेस्योनेन मे
सन्तिष्ठस्वेतः कृधि ददुध्मस्यूहतामष्टौ च।।

७. ब्रह्मणो योनिर॰ हसः पङ्क्तिं प्रपद्ये
दीक्षा ययाऽदित्यो दीक्षया दीक्षितस्तया त्वा दीक्षया
दीक्षयाम्योषधयो दीक्षा द्यौस्त्वा दीक्षमाणमनु-
दीक्षतामपचितिश्चाक्षितिरुत्तरस्मिन् गमेयन्दिशः पाद
आदित्यवती र्व्वर्तय पञ्च च।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. कृधि मीढुषेऽहुतस्य च सप्त च।।

०९. चातयत श्रीणीताꣳ सत्यमाहुरशीमहि गणे कुरु विद्रवणे पितृयाणा अर्को रजसो विमान स्त्रीणि च।।

१०. उदरूष इन्द्रियेण गामति ररपा अगाल् त्रीणि च।।

११. देवाꣳ श्चित्रन्तनूभ्य स्स्वाहोनं पुरुषसम्मितोऽग्ने तदस्य कल्पय पञ्च च।।

१२. अनेन समष्ठीवद्भ्याꣳ सति पराशसानशेऽग्निर्मातस्मादेनसः पुनीतन स्त्रीणि च।।

यद्देवादेवा ऋतेन सजातशꣳ साद्यद्वाचा यद्धस्ताभ्यामदीव्य य्यँन्मयि माता यदापिपेष यदन्तरिक्ष य्यँदाशसाऽतिक्रामामि त्रितेदेवा दिविजाता यदाप इमं मे वरुण तत्वायामि त्वन्नो अग्ने सत्वन्नो

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिद्रम्

अग्ने त्वमग्ने अयासि।।

१३. त्मना जायमानोऽस्यदधत्पञ्च च।।

१४. वनस्पतावद्भ्यो लोका दधिरे तेज इन्द्रियन्धामाशीमहीवाभि नश्शीयताꣳरयिरेकञ्च।।

सर्वान् यद्विष्षण्णेन विवै याः पुरस्ताद्देवा देवेषु परिस्तृणीत सक्षेद य्यँदस्य पारेऽनागस उदस्तांफसीद्ब्रह्म प्रतिष्ठा यद्देवा यत्ते ग्राव्णा यद्दिदीक्षे चतुर्दश।।

सर्वान्भूतिमेव यामेवाफस्वाहुति क्रँताना क्रँतपते पर्णवल्क स्सोम्यानामस्मिन् यज्ञेऽग्ने योनो ज्योग्जीवाः परोरजास्ते प्रतेमहे ब्रह्म प्रतिष्ठा गारूहपत्य स्त्रिꣳशदुत्तर शतम्।। सर्वाञ्छचीपतिः।।

***** ।। हरिः ओ(३)म् ।। *****

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.